# Bhrigumaharshikritam Karunabhyudayam Nama Shiva Stotram

# भृगुमहर्षिकृतं करुणाभ्युदयं नाम शिवस्तोत्रम्

## Document Information

Text title : Bhrigumaharshikritam Karunabhyudayam Nama Shiva Stotram

File name : bhRRigumaharShikRRitaMkaruNAbhyudayaMnAmashivastotram.itx

Category : shiva, matsyapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : matsyapurANa | adhyAya 193/34-45||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 27, 2024

*sanskritdocuments.org*

# भृगुमहर्षिकृतं करुणाभ्युदयं नाम शिवस्तोत्रम्

भृगुरुवाच ।
प्रणिपत्य भूतनाथं भवोद्भवं त्वामहं दिव्यरूपम् ।
भवातीतो भुवनपते प्रभो तु विज्ञापये किञ्चित् ॥ ३४॥

त्वद्गुणनिकरान्वक्तुं कः शक्तो भवति मानुषो नाम ।
वासुकिरपि हि कदाचिद्वदनसहस्रं भवेद्यस्य ॥ ३५॥

भक्त्या तथाऽपि शङ्कर भुवनपते त्वत्स्तुतौ मुखरः ।
वदतः क्षमस्व भगवन्प्रसीद मे तव चरणपतितस्य ॥ ३६॥

सत्त्वं रजस्तमस्त्वं स्थित्युत्पत्त्योर्विनाशने देव ।
त्वां मुक्त्वा भुवनपते भुवनेश्वर नैव दैवतं किञ्चित् ॥ ३७॥

यमनियमयज्ञदानवेदाभ्यासाश्च धारणा योगः ।
त्वद्भक्तेः सर्वमिदं नार्हति हि कलासहस्रांशम् ॥ ३८॥

उच्छिष्टरसरसायनखड्गाञ्जनपादुकाविवरसिद्धिर्वा ।
चिह्नं भवव्रतानां दृश्यति चेह जन्मनि प्रकटम् ॥ ३९॥

शाठ्येन नमति यद्यपि ददासि त्वं भूतिमिच्छतो देव ।
भक्तिर्भवभेदकरी मोक्षाय विनिर्मिता नाथ ॥ ४०॥

परदारपरस्वरतं परपरिभवदुःखशोकसन्तप्तम् ।
परवदनवीक्षणपरं परमेश्वरं मां परित्राहि ॥ ४१॥

मिथ्याभिमानदग्धं क्षणभङ्गुरदेहविलसितं क्रूरम् ।
कुपथाभिमुखं पतितं त्वं मां पापात्परित्राहि ॥ ४२॥

दीने द्विजगणसार्थे बन्धुजनेनैव दूषिता ह्याशा ।
तृष्णा तथाऽपि शङ्कर किं मूढं मां विडम्बयति ॥ ४३॥

तृष्णां हरस्व शीघ्रं लक्ष्मीं प्रदत्स्व यावदासिनीं नित्यम् ।

छिन्धि मदमोहपाशानुत्तारय मां महादेव ॥ ४४॥

करुणाभ्युदयं नाम स्तोत्रमिदं सर्वसिद्धिदं दिव्यम् ।
यः पठति भक्तियुक्तस्तस्य तुष्येद्भृगोर्यथा च शिवः ॥ ४५॥

इति मत्स्यपुराणे त्रिनवत्यधिकशततमाध्यायान्तर्गतं
भृगुमहर्षिकृतं करुणाभ्युदयं नाम शिवस्तोत्रं समाप्तम् ।

मत्स्यपुराण । अध्याय १९३/३४-४५॥

matsyapurANa . adhyAya 193/34-45..

Proofread by PSA Easwaran

*Bhrigumaharshikritam Karunabhyudayam Nama Shiva Stotram*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*